## संस्कृत

### द्वितीय प्रश्न पत्र (वैदिकसाहित्य, गद्य साहित्यम्, अनुवादः व्याकरणम् च)

**Time allowed : Three hours** | **Maximum Marks : 100**

1. अधोलिखित मयोः हिन्दी भाषायाम् अनुवादः करणीयः–

(क) राजन्तमध्वराणां गोपामृतस्य दीदिवम्।
वर्धमानं स्वे दमे।।

अथवा

प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्ठ–

http://questionpaperesult.com/

Scanned by CamScanner

धिक्षियन्ति भुवनानि विश्वा।।

(ख) ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं
सुखं रथं सुषदं भूरिवारम्।
चित्रामधा यस्य योगेऽधिजज्ञे
तं वां हुवे अतिरिक्तं पिबध्यै।।

अथवा

समानो मन्त्र समितिः समामी
समानं मनः सह चित्तमेषाम्।
समानं मन्त्रममिमन्त्रये यः
समानेन वो हविषा जुहोमि।।

2. अधोलिखितेषु प्रश्नेषु पञ्चप्रश्नानां संस्कृतभाषाया उत्तराणि देयानि–

(क) अग्न सुक्तस्य ऋषि कः सूक्तसंख्या च कर?

(ख) ऋग्वेद कस्य देवस्य अधिकं स्तवनं प्राप्यते?

(ग) इन्द्रस्य प्रमुखायुधं किम्?

(घ) संज्ञान सूक्ते कस्य वर्णनमस्ति।

(ङ) प्रजापतिसूक्ते प्रयुक्तछन्दसः किं नाम?

(च) ऋग्वेदस्य कस्मात् मण्डलात् विष्णुसूक्तम् उद्घृतम्?

3. अधोलिखित मन्त्रस्य रासन्दर्भ हिन्दीभाषायां संस्कृतभाषायां वा व्याख्या करणीया–

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति।।

अथवा

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्धान्
व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

4. अधोलिखितयोः द्वयोः गद्यांशयोः हिन्दी भाषायाम् अनुवादः करणीयः–

(क) विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युप–देष्टव्यमस्ति। केवलञ्च निसर्गत एव अभानुभेद्यम–रत्नालोकोच्छेद्यम प्रदीपप्रमापनेयमतिगहनं तयो यौवन प्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्ति–साध्यमपरम्। ऐश्वर्यतिमिरान्धत्वम्। अशिशिरोपवा–रहार्य्योऽतितीव्रोः दर्पदाहज्वरोष्मा।

(ख) भवादृशा एव भवन्ति भाजनानि उपदेशानाम्। अपगत मले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शंखाभरणमाननशोभा समुदयमधिकतरमुपजनयति।

(ग) लतेव विटपकानध्यारोहति। मंगेव व सुजनन्यपि तरंगबुद्बुदचञ्चला। दिवसकर गतिरिव प्रकटित विविध संक्रांतिः पातालगुहेव तमो बहुलाहिडिम्बेव भीम साहसैकहार्य्यहृदया। प्रावृडिवाचिर द्युतिकारिणी। दुष्टिपिशाचीव दर्शितानेकपुरुषोच्छाया स्वल्यसत्त्वमुन्मत्तीकरोति। सरस्वती परिग्रहीतमीर्ष्ययेव नालिंगति जनं गुणवन्तम पवित्रमिव न स्पृशति, उदारसत्वममंगलमिव न बहु मन्यते।

(घ) सर्वथा तममिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति तं संवर्धयन्ति तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति योऽहर्निशमनवरतमुपर–चिताञ्जलिरधिदैवतमिव विगतान्य कर्त्तव्यः सतौति, यो वा माहात्म्यमुद्भादयति।

http://questionpaperresult.com/

Scanned by CamScanner

5. केषाञ्चित् पञ्चप्रश्नानां उत्तरं संस्कृतभाषायां देयम्–
(क) शुकनासोपदेशः कस्य ग्रन्थस्य अंश अस्ति?
(ख) का परिचयं न रक्षति? (ग) शुकनासः कः आसीत्?
(घ) गुरूपदेश कीदृशं स्नानम् अस्ति?(ङ) लक्ष्मीः मोहनशक्ति कस्मात् गृहीतवती?
(च) इन्दुशकलात् लक्ष्मी किं गृहीत्वा उद्गता?
(छ) हृदये किमिव गलति उपदिष्टम्?

6. अधोलिखित वाक्यानां हिन्दी भाषायाम् अनुवादः करणीयः–
(i) स्वं स्वं चरित्र शिक्षेरन् पृथिव्यां सर्वमानवाः।
(ii) पयः पानं भुजंगाना केवलं विषवर्धनम्।
(iii) साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीन।
(iv) विना पुरुषकारेण दैवं न सिद्ध्यति।
(v) मितं च सारं च वचो हि वाग्मिता।
(vi) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।
(vii) ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति।
(viii) उद्यमेन हि सध्यन्ति कार्याणि न मनोरथैः।
(ix) किं किं न साधयति कल्पलतेव विद्या।
(x) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

7. अधोलिखित सूत्रेषु त्रयाणां सुत्राणां व्याख्या सोदाहरणं कार्या–
(क) ह्रस्वनद्यापो नुट् (ख) ङेर्य (ग) न विभक्तौ तुस्माः
(घ) ह्रस्वस्य गुण (ङ) जसि च (च) याडापः

8. अधोलिखित पदेषु त्रयाणां पदानां सुत्रोल्लेखपूर्वकं सिद्धिं करणीया–
(क) रामेण (ख) रामेभ्यः (ग) हरेः (घ) सर्वान्
(ङ) रमया (च) ज्ञानानि (छ) वारिणी (ज) रमाभ्याम्
(झ) आवयोः

9. अधोलिखितेषु केषाञ्चित् चतुर्णां सूत्राणां व्याख्या करणीया–
(क) कर्तुरीप्सिततमं कर्म। (ख) कर्तृकरणयोस्तृतीया।
(ग) षष्ठीशेषे। (घ) कर्मण यमभिप्रैति स सम्प्रदानम्।
(ङ) ध्रुवमपायेऽपादानम्। (च) यस्य च भावेन भावलक्षणम्।

http://questionpaperesult.com/

Scanned by CamScanner